# Hanuman Ji Ke 108 Naam

ओं हनुमते नमः ।
ओं अञ्जनापुत्राय नमः ।
ओं वायुसूनवे नमः ।
ओं महाबलाय नमः ।
ओं रामदूताय नमः ।
ओं हरिश्रेष्ठाय नमः ।
ओं सूरिणे नमः ।
ओं केसरिनन्दनाय नमः ।
ओं सूर्यश्रेष्ठाय नमः ।९।

ओं महाकायाय नमः ।
ओं वज्रिणे नमः ।
ओं वज्रप्रहारवते नमः ।
ओं महासत्त्वाय नमः ।
ओं महारूपाय नमः ।
ओं ब्रह्मण्याय नमः ।
ओं ब्राह्मणप्रियाय नमः ।
ओं मुख्यप्राणाय नमः ।
ओं महाभीमाय नमः ।१८।

ओं पूर्णप्रज्ञाय नमः ।
ओं महागुरवे नमः ।
ओं ब्रह्मचारिणे नमः ।
ओं वृक्षधराय नमः ।
ओं पुण्याय नमः ।
ओं श्रीरामकिङ्कराय नमः ।
ओं सीताशोकविनाशिने नमः ।
ओं सिंहिकाप्राणनाशकाय नमः ।
ओं मैनाकगर्वभङ्गाय नमः । २७

ओं छायाग्रहनिवारकाय नमः ।
ओं लङ्कामोक्षप्रदाय नमः ।
ओं देवाय नमः ।
ओं सीतामार्गणतत्पराय नमः ।
ओं रामाङ्गुलिप्रदात्रे नमः ।
ओं सीताहर्षविवर्धनाय नमः ।
ओं महारूपधराय नमः ।
ओं दिव्याय नमः ।
ओं अशोकवननाशकाय नमः । ३६

ओं मन्त्रिपुत्रहराय नमः ।
ओं वीराय नमः ।
ओं पञ्चसेनाग्रमर्दनाय नमः ।
ओं दशकण्ठसुतघ्नाय नमः ।

# Hanuman Ji Ke 108 Naam

ओं ब्रह्मास्त्रवशगाय नमः ।
ओं अव्ययाय नमः ।
ओं दशास्यसल्लापपराय नमः ।
ओं लङ्कापुरविदाहकाय नमः ।
ओं तीर्णाब्धये नमः |४५|

ओं कपिराजाय नमः ।
ओं कपियूथप्ररञ्जकाय नमः ।
ओं चूडामणिप्रदात्रे नमः ।
ओं श्रीवश्याय नमः ।
ओं प्रियदर्शकाय नमः ।
ओं कौपीनकुण्डलधराय नमः ।
ओं कनकाङ्गदभूषणाय नमः ।
ओं सर्वशास्त्रसुसम्पन्नाय नमः ।
ओं सर्वज्ञाय नमः । ५४

ओं ज्ञानदोत्तमाय नमः ।
ओं मुख्यप्राणाय नमः ।
ओं महावेगाय नमः ।
ओं शब्दशास्त्रविशारदाय नमः ।
ओं बुद्धिमते नमः ।
ओं सर्वलोकेशाय नमः ।
ओं सुरेशाय नमः ।
ओं लोकरञ्जकाय नमः ।
ओं लोकनाथाय नमः । ६३

ओं महादर्पाय नमः ।
ओं सर्वभूतभयापहाय नमः ।
ओं रामवाहनरूपाय नमः ।
ओं सञ्जीवाचलभेदकाय नमः ।
ओं कपीनां प्राणदात्रे नमः ।
ओं लक्ष्मणप्राणरक्षकाय नमः ।
ओं रामपादसमीपस्थाय नमः ।
ओं लोहितास्याय नमः ।
ओं महाहनवे नमः |७२|

ओं रामसन्देशकर्त्रे नमः ।
ओं भरतानन्दवर्धनाय नमः ।
ओं रामाभिषेकलोलाय नमः ।
ओं रामकार्यधुरन्धराय नमः ।
ओं कुन्तीगर्भसमुत्पन्नाय नमः ।
ओं भीमाय नमः ।
ओं भीमपराक्रमाय नमः ।
ओं लाक्षागृहाद्विनिर्मुक्ताय नमः ।
ओं हिडिम्बासुरमर्दनाय नमः । ८१

ओं धर्मानुजाय नमः ।
ओं पाण्डुपुत्राय नमः ।

# Hanuman Ji Ke 108 Naam

ओं धनञ्जयसहायवते नमः ।
ओं बलासुरवधोद्युक्ताय नमः ।
ओं तद्ग्रामपरिरक्षकाय नमः ।
ओं नित्यं भिक्षाहाररताय नमः ।
ओं कुलालगृहमध्यगाय नमः ।
ओं पाञ्चाल्युद्वाहसञ्जातसम्मोदाय नमः ।
ओं बहुकान्तिमते नमः । ९०

ओं विराटनगरे गूढचराय नमः ।
ओं कीचकमर्दनाय नमः ।
ओं दुर्योधननिहन्त्रे नमः ।
ओं जरासन्धविमर्दनाय नमः ।
ओं सौगन्धिकापहर्त्रे नमः ।
ओं द्रौपदीप्राणवल्लभाय नमः ।
ओं पूर्णबोधाय नमः ।
ओं व्यासशिष्याय नमः ।
ओं यतिरूपाय नमः । ९९

ओं महामतये नमः ।
ओं दुर्वादिगजसिंहस्य तर्कशास्त्रस्य खण्डनाय नमः ।
ओं बौद्धागमविभेत्त्रे नमः ।
ओं साङ्ख्यशास्त्रस्य दूषकाय नमः ।
ओं द्वैतशास्त्रप्रणेत्रे नमः ।
ओं वेदव्यासमतानुगाय नमः ।
ओं पूर्णानन्दाय नमः ।
ओं पूर्णसत्वाय नमः ।
ओं पूर्णवैराग्यसागराय नमः |१०८|